# bilvAShTakam 2

# બિલ્વાષ્ટકમ્ ૨

## Document Information

Text title : bilvAShTakam 2

File name : bilvAShTakam2.itx

Category : aShTaka, shiva

Location : doc_shiva

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Translated by : N.Balasubramanian bbalu@satyam.net.in

Latest update : July 1, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# બિલ્વાષ્ટકમ્ ૨

ત્રિદલં ત્રિગુણાકારં ત્રિણેત્રં ચ ત્રિયાયુધમ્ ।
ત્રિજન્મપાપસંહારં એકબિલ્વં શિવાર્પણમ્ ॥ ૧॥

ત્રિશાકૈર્બિલ્વપત્રૈશ્ચ અચ્છિદ્રૈઃ કોમલૈશ્શુભૈઃ ।
તવ પૂજાં કરિષ્યામિ એકબિલ્વં શિવાર્પણમ્ ॥ ૨॥

દર્શનં બિલ્વવૃક્ષસ્ય સ્પર્શનં પાપનાશનમ્ ।
અઘોરપાપસંહારં એકબિલ્વં શિવાર્પણમ્ ॥ ૩॥

કાશીક્ષેત્રનિવાસં ચ કાલભૈરવદર્શનમ્ ।
પ્રયાગે માધવં દૃષ્ટ્વા એકબિલ્વં શિવાર્પણમ્ ॥ ૪॥

તુલસી બિલ્વનિર્ગુણ્ડી જંબીરામલકં તથા ।
પઞ્ચબિલ્વમિતિ ખ્યાતા  એકબિલ્વં શિવાર્પણમ્ ॥ ૫॥

તટાકં ધનનિક્ષેપં બ્રહ્મસ્થાપ્યં શિવાલયમ્ ।
કોટિકન્યામહાદાનં એકબિલ્વં શિવાર્પણમ્ ॥ ૬॥

દન્ત્યશ્વકોટિદાનાનિ અશ્વમેધશતાનિ ચ ।
કોટિકન્યામહાદાનં એકબિલ્વં શિવાર્પણમ્ ॥ ૭॥

સાલગ્રામસહસ્રાણિ વિપ્રાન્નં શતકોટિકમ્ ।
યજ્ઞકોટિસહસ્રાણિ એકબિલ્વં શિવાર્પણમ્ ॥ ૮॥

અજ્ઞાનેન કૃતં પાપં જ્ઞાનેનાપિ કૃતં ચ યત્ ।
તત્સર્વં નાશમાયાતુ એકબિલ્વં શિવાર્પણમ્ ॥ ૯॥

એકૈકબિલ્વપત્રેણ કોટિયજ્ઞફલં લભેત્ ।
મહાદેવસ્ય પૂજાર્થં એકબિલ્વં શિવાર્પણમ્ ॥ ૧૦॥

અમૃતોદ્ભવવૃક્ષસ્ય મહાદેવપ્રિયસ્ય ચ ।
મુચ્યન્તે કણ્ટકાઘાતા કણ્ટકેભ્યો હિ માનવાઃ ॥ ૧૧॥

॥ ૐ તત્સત્ ॥

Encoded and proofread by
N.Balasubramanian bbalu at satyam.net.in

*bilvAShTakam 2*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*